अध्याय 6: डिजिभारतम् – युगपरिवर्तनम्

विषय-सूची

9 प्रश्नावली · 38 प्रश्न

प्रश्नावली 1	पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत	5 प्रश्न
प्रश्नावली 2	पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत	6 प्रश्न
प्रश्नावली 3	अधः दत्तान् शब्दान् सम्यक् संयोजयत	5 प्रश्न
प्रश्नावली 4	अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत	5 प्रश्न
प्रश्नावली 5	अधः अस्मिन् पाठे आगतानां शब्दानाम् आधारेण शब्दजालं प्रदत्तम् अस्ति । अत्र वामतः दक्षिणम् उपरितः अधः च आधारं कृत्वा उदाहरणानुसारं शब्दान् रेखाङ्कयत	1 प्रश्न
प्रश्नावली 6	अधोलिखितान् शब्दान् वर्गद्वये विभजत- सङ्गणकसम्बद्धाः, असङ्गणकसम्बद्धाः च (शब्दा:- अन्तर्जालम्, शिक्षिका, सङ्गणकः, विद्यालयः, ई-पत्रम्, पाठ्यपुस्तकम्, डिजिटल् लेखनी)	1 प्रश्न
प्रश्नावली 7	अधोलिखितानि वाक्यानि पठित्वा शुद्धं (✓) अशुद्धं (✗) वा इति चिह्नीकुरुत	7 प्रश्न
प्रश्नावली 8	अव्यवस्थितान् वर्णान् शब्ददृष्ट्या व्यवस्थितरूपेण लिखत (उदाहरणम् – वेयवित्तीसमानशम् = वित्तीयसमावेशनम्)	5 प्रश्न
प्रश्नावली 9	अधोलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत	3 प्रश्न

प्रश्नावली 1 — पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत

प्रश्न 1

(क) प्रधानमन्त्रिसङ्ग्रहालये कीदृशी प्रौद्योगिकी प्रयुक्ता अस्ति ?

हल

पाठानुसारम् एकपदेन उत्तरम्।

उत्तर: डिजिटल्

प्रश्न 2

(ख) हॉलोग्राम्-द्वारा कस्य भाषणं दृश्यते ।

हल

पाठानुसारम् एकपदेन उत्तरम्।

उत्तर: प्रधानमन्त्रिणः

प्रश्न 3

(ग) कस्याः प्रभावः दैनन्दिनजीवने दृश्यते ?

हल

पाठानुसारम् एकपदेन उत्तरम्।

उत्तर: डिजिटल् – योजनायाः

प्रश्न 4

(घ) भारत-सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना का अस्ति ?

हल

पाठानुसारम् एकपदेन उत्तरम्।

उत्तर: डिजिटल् – योजना

प्रश्न 5

(ङ) 'फास्टॅग्' इत्यस्य उपयोगेन कस्य सङ्ग्रहणं भवति ?

हल

पाठानुसारम् एकपदेन उत्तरम्।

उत्तर: मार्गशुल्कस्य ।

प्रश्नावली 2 — पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत

प्रश्न 1

(क) प्रधानमन्त्रिसङ्ग्रहालये का: डिजिटल प्रौद्योगिक्यः प्रदर्शिताः सन्ति?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: प्रधानमन्त्रिसङ्ग्रहालये विविधाः डिजिटल्- प्रौद्योगिक्यः प्रदर्शिताः सन्ति ।

प्रश्न 2

(ख) जनाः किमर्थं साङ्गणिक – अपराधेन पीडिता: भवन्ति ?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: जनाः लोभात् भयात् वा साङ्गणिक- अपराधेन पीडिताः भवन्ति ।

प्रश्न 3

(ग) यशिका 'डिजि – लॉकर्' इत्यस्य उपयोगं कथं करोति?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: यशिका 'डिजि- लॉकर्' इत्यस्य उपयोगं आधारपत्रं विद्यालयीयं प्रमाणपत्रं च सुरक्षितं कर्तुं करोति ।

प्रश्न 4

(घ) डिजिटल – भारतस्य वित्तीयसमावेशने का : योजना : सन्ति?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: डिजिटल – भारतस्य वित्तीयसमावेशनस्य क्षेत्रे 'यूपीआय्', 'रूपे कार्ड', जनधनयोजना इत्यादीनि बहूनि योजनाः सन्ति ।

प्रश्न 5

(ङ) डिजिटल – भारते शिक्षायाः क्षेत्रे केषां पटलानाम् उपयोगः करणीयः ?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: डिजिटल्-भारते शिक्षायाः क्षेत्रे 'दीक्षा', 'स्वयम्', 'स्वयं-प्रभा', 'ई- पाठशाला', 'भारतीय – राष्ट्रिय – डिजिटल् – पुस्तकालयः', 'निष्ठा', 'पीएम्-ई-विद्या', निःशुल्क-डिजिटल्- शैक्षिकमञ्चः च उपयोगः करणीयः ।

प्रश्न 6

(च) ग्राम्य: क्षेत्रेषु डिजिटल – सेवानां समस्या कथं निराकर्तुं शक्यते ?

हल

पाठानुसारम् पूर्णवाक्येन उत्तरम्।

उत्तर: ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या अन्तर्जालस्य उत्तरोत्तरं विस्तारेण निराकर्तुं शक्यते ।

प्रश्नावली 3 — अधः दत्तान् शब्दान् सम्यक् संयोजयत

प्रश्न 1

(क) हॉलोग्राम्

हल

मेलनम्।

उत्तर: कृत्रिम बुद्धिः (AI)

प्रश्न 2

(ख) यूपीआय्

हल

मेलनम्।

उत्तर: शीघ्रं सुरक्षितं सुगमं च डिजिटल् धनादेय प्रत्यर्पणम् ।

प्रश्न 3

(ग) डिजि – लॉकर

हल

मेलनम्।

उत्तर: डिजिटल् प्रमाणपत्रम्

प्रश्न 4

(घ) फास्टॅग्

हल

मेलनम्।

उत्तर: राजमार्गेषु स्वचालितविधिना मार्गशुक्लस्य शीघ्रं संग्रहणम् ।

प्रश्न 5

(ङ) वीआर

हल

मेलनम्।

उत्तर: आभासीया वास्तविकता ।

प्रश्नावली 4 — अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत

प्रश्न 1

(क) प्रधानमन्त्रिसङ्ग्रहालये हॉलोग्राम-द्वारा _____ दृश्यते ।

हल

मञ्जूषातः उचितपदेन रिक्तस्थानपूर्तिः।

उत्तर: प्रधानमन्त्रिणः भाषणं

प्रश्न 2

(ख) डिजिटल्-भारतस्य आर्थिकसमावेशनं सुगमं कर्तुं _____ प्रणाली अस्ति ।

हल

मञ्जूषातः उचितपदेन रिक्तस्थानपूर्तिः।

उत्तर: यूपीआय्

प्रश्न 3

(ग) डिजिटल – शासनं _____ सेवा प्रददाति ।

हल

मञ्जूषातः उचितपदेन रिक्तस्थानपूर्तिः।

उत्तर: स्वचालितं पारदर्शकं च

प्रश्न 4

(घ) डिजिटल – भारतस्य शिक्षाक्षेत्रे _____ नाम डिजिटल – शैक्षिक मञ्चः अस्ति ।

हल

मञ्जूषातः उचितपदेन रिक्तस्थानपूर्तिः।

उत्तर: दीक्षा

प्रश्न 5

(ङ) भारतस्य डिजिटल – परिवर्तनं सर्वाणि _____ क्षेत्राणि स्पृशति ।

हल

मञ्जूषातः उचितपदेन रिक्तस्थानपूर्तिः।

उत्तर: जीवनं ।

प्रश्नावली 5 — अधः अस्मिन् पाठे आगतानां शब्दानाम् आधारेण शब्दजालं प्रदत्तम् अस्ति । अत्र वामतः दक्षिणम् उपरितः अधः च आधारं कृत्वा उदाहरणानुसारं शब्दान् रेखाङ्कयत

प्रश्न 1

शब्दजालात् पाठे आगतान् शब्दान् रेखाङ्कयत ।

हल

शब्दजालात् निम्नलिखिताः शब्दाः प्राप्यन्ते।

उत्तर: 1. डिजिलॉकर् 2. संवादयन्त्रम् 3. माय् गव् 4. यूपीआय् 5. डिजिटल 6. वर्धिताः 7. हॉलोग्राम् 8. प्रौद्योगिकी 9. फास्टॅग 10. स्वयं प्रभा 11. अर्थव्यवस्था 12. कृत्रिमबुद्धिः 13. विनिमय 14. राजमार्ग 15. पीएम् किसान् 16. शिक्षा 17. निष्ठा 18. विज्ञान् 19. आभासीय 20. शासन् 21. वाणिज्यम्

प्रश्नावली 6 — अधोलिखितान् शब्दान् वर्गद्वये विभजत- सङ्गणकसम्बद्धाः, असङ्गणकसम्बद्धाः च (शब्दा:- अन्तर्जालम्, शिक्षिका, सङ्गणकः, विद्यालयः, ई-पत्रम्, पाठ्यपुस्तकम्, डिजिटल् लेखनी)

प्रश्न 1

दत्तान् शब्दान् सङ्गणकसम्बद्धाः असङ्गणकसम्बद्धाः च इति वर्गद्वये विभजत ।

हल

सङ्गणकेन सम्बद्धाः शब्दाः एकस्मिन् वर्गे, तदितरे अपरस्मिन् वर्गे।

उत्तर: सङ्गणकसम्बद्धाः – अन्तर्जालम्, सङ्गणकः, ई-पत्रम्, डिजिटल् लेखनी । असङ्गणकसम्बद्धाः – शिक्षिका, विद्यालयः, पाठ्यपुस्तकम् ।

प्रश्नावली 7 — अधोलिखितानि वाक्यानि पठित्वा शुद्धं (✓) अशुद्धं (✗) वा इति चिह्नीकुरुत

प्रश्न 1

(क) हॉलोग्राम् कृत्रिमबुद्धेः एकः प्रकारः अस्ति ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✓

प्रश्न 2

(ख) वर्धित-वास्तविकतायाः उपयोगिता ऐतिहासिक- घटनानां प्रत्यक्षानुभवाय अस्ति ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✓

प्रश्न 3

(ग) डिजिटल – प्रक्षेपण – मानचित्रं भारतस्य विकासयात्रां प्रदर्शयति ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✓

प्रश्न 4

(घ) फ़ास्टॅग् इति राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणं करोति ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✓

प्रश्न 5

(ङ) डिजी – लॉकर् इत्यस्य माध्यमेन केवलम् आधार-पत्रं सुरक्षितुं शक्यते ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✗

प्रश्न 6

(च) भारतस्य डिजिटल – परिवर्तनं केवलं शासने प्रभावं करोति, नागरिकजीवने न ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✗

प्रश्न 7

(छ) उमङ्ग्, माय्-गव्, जेम् इत्यादयः ई-शासन- मञ्चाः सन्ति ।

हल

पाठानुसारम् शुद्धम् अथवा अशुद्धम् इति निर्णयः।

उत्तर: ✓

प्रश्नावली 8 — अव्यवस्थितान् वर्णान् शब्ददृष्ट्या व्यवस्थितरूपेण लिखत (उदाहरणम् – वेयवित्तीसमानशम् = वित्तीयसमावेशनम्)

प्रश्न 1

(क) कसङ्गम्ण

हल

वर्णान् व्यवस्थितरूपेण योजयित्वा शुद्धः शब्दः।

उत्तर: सङ्गणकम्

प्रश्न 2

(ख) कार्वसरः

हल

वर्णान् व्यवस्थितरूपेण योजयित्वा शुद्धः शब्दः।

उत्तर: सर्वकारः

प्रश्न 3

(ग) लय: विद्या

हल

वर्णान् व्यवस्थितरूपेण योजयित्वा शुद्धः शब्दः।

उत्तर: विद्यालयः

प्रश्न 4

(घ) जिकडिलॉर्

हल

वर्णान् व्यवस्थितरूपेण योजयित्वा शुद्धः शब्दः।

उत्तर: डिजिलॉकर्

प्रश्न 5

(ङ) शक्तसुम्

हल

वर्णान् व्यवस्थितरूपेण योजयित्वा शुद्धः शब्दः।

उत्तर: सुशक्तम्

प्रश्नावली 9 — अधोलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत

प्रश्न 1

(क) अद्यतनं युगं कीदृशम् अस्ति ?

हल

परिच्छेदानुसारम् उत्तरम्।

उत्तर: अद्यतनं युगं विज्ञानयुगम् अस्ति ।

प्रश्न 2

(ख) मानवाः केषां साहाय्येन कार्याणि शीघ्रं कुर्वन्ति ?

हल

परिच्छेदानुसारम् उत्तरम्।

उत्तर: मानवा: अन्तर्जालस्य, सचलदूरवाण्याः, सङ्गणकस्य च साहाय्येन शीघ्रं कार्याणि कुर्वन्ति ।

प्रश्न 3

(ग) ई-अधिगम-प्रणाल्याः प्रयोगं के कुर्वन्ति ?

हल

परिच्छेदानुसारम् उत्तरम्।

उत्तर: विद्यार्थिनः ई- अधिगम – प्रणाल्याः प्रयोगं कुर्वन्ति ।